International Journal of Sanskrit Research 2025; 11(2): 108-112

International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2025; 11(2): 108-112
© 2025 IJSR
www.anantaajournal.com
Received: 06-02-2025
Accepted: 09-03-2025

**सौम्य रञ्जन महापात्र**
प्राचार्य, चूड़ामणि संस्कृत संस्थानम्, विश्वस्थली, बसोहली, कठुआ, जम्मू-कश्मीर, भारत

**Corresponding Author:**
**सौम्य रञ्जन महापात्र**
प्राचार्य, चूड़ामणि संस्कृत संस्थानम्, विश्वस्थली, बसोहली, कठुआ, जम्मू-कश्मीर, भारत

# अभिज्ञानशाकुन्तलनाटके लोकोपदेशः

**सौम्य रञ्जन महापात्र**

**प्रस्तावना**
अतिविस्तृतं संस्कृतसाहित्यं वैदिकलौकिकभेदाभ्यां द्विधा प्रथते। वैदिकसाहित्ये वेदा:, संहिताग्रन्था:, ब्राह्मणग्रन्था:, आरण्यकग्रन्था:, उपनिषदश्च गृह्यन्ते। आदिकवे: वाल्मीके: रामायणरचनाया: परं लौकिकसंस्कृतसाहित्यस्य रचनाधारा प्रवर्तते। महर्षे: व्यासस्य महाभारत तथा श्रीमद्भागवतमपि लौकिकसंस्कृतसाहित्यस्योपजीव्यकाव्यग्रन्थत्वेन स्वीकुर्वन्ति सहृदया:। तत्र वैदिकं, लौकिकं चेति उभयविधसाहित्यमपि विश्वमानवहिताय प्रवर्तते। यत: हितेन सह वर्त्तमानं सहितं, तस्य भाव: साहित्यमिति व्युत्पत्या युगे युगे साहित्यमेव विश्ववासिनां हितं साधयितुं सर्वथा विविधभाषामाश्रित्य अभिनवरूपेण अवतरति। यस्य राष्ट्रस्य साहित्यं यथा सुसमृद्धं, तद्राष्ट्रं तदनुगुणतया प्रगतिपथे अग्रे सरतीति समाजशास्त्रिणामभिमतमस्ति। तत्र विविधभाषासाहित्येषु प्राचीनस्य संस्कृतसाहित्यस्य योगदानमभिनवराष्ट्रनिर्माणे अतुलनीयं भवति।
भारतीयविचारधारानुसारं शास्त्रकारा: विविधानि नीतिशास्त्राणि लोकोपदेशार्थं विरचितवन्त:। तत्र शब्दप्रधानानि वेदादिशास्त्राणि प्रसिद्धानि। वेदोपदेश: प्रभुसम्मितोपदेशित्वेन ज्ञायते। कोऽपि जन: प्रभो: वाक्यं पालयेत्, न पालयेद्वा। तथैव अर्थप्रधानानि प्राचीनवृत्तवर्णनपराणि पुराणानि सुहृत्सम्मितानि भवन्ति। सुहृद: उपदेशोऽपि लोके कदाचित् गृह्यते, कदाचित् न गृह्यते च। पुराणेतिहासादय: ग्रन्था: “एवं कृते इदमिष्टं भवति, एवं च कृते इदमनिष्टं भवति” इति एतावन्मात्रं बोधयन्ति। किन्तु लोकोत्तरवर्णनानिपुणं कविकर्मरूपं काव्यं कान्ता इव सरसतापादनेन अभिमुखी कृत्य रामादिवत् प्रवर्तितव्यं, न तु रावणादिवत् इति उपदिशति। अत: काव्योपदेश: कान्तासम्मितोपदेश: इति कथ्यते। कान्ता यथा दयितं गुरुमित्राद्यधीनमपि कटाक्षभुजाक्षेपादिना सरसतामापाद्य स्वाभिमुखीकृत्य स्वस्मिन् प्रवर्तयति, तथैव काव्यमपि सुकुमारमतीन् नीतिशास्त्रपराङ्मुखान् राजकुमारादीन् सन्मार्गे प्रवर्तयति। सदुपदेशग्रहणविमुखानां जनानां कृते काव्यं मधुरकोमलकान्तपदावलीसमन्वितं शृङ्गाररसेन कटुकषायौषधपराङ्मुखान् बालकान् इव मधुरपानकरसादिना स्वाभिमुखीकृत्य सदुपदेशग्रहणार्थं प्रेरयति। तदुक्तं –

स्वादुकाव्यरसोन्मिश्रं वाक्यार्थमुपभुञ्जते।
प्रथमालीढमधव: पिबन्ति कटुभेषजम्।। (का.प्र.झलकीकरटीका, पृष्ट.१०)

तस्मात् काव्यप्रयोजनसन्दर्भे वाग्देवतावतारेण मम्मटाचार्येण स्वीये काव्यप्रकाशे यथार्थत: कथितम् –

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।
सद्य: परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।। (का.प्र.१.२)

तदुक्तमपि भामहेन -

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिषेवणम्।। इत्यादि।

तदप्युक्तं साहित्यदर्पणे –

चतुर्वर्गफलप्राप्ति: सुखादल्पधियामपि।
काव्यादेव यतस्तेन तत्स्वरूपं निरूप्यते।। इत्यादि।

मानवीयव्यवहारज्ञानाय सत्काव्यमेव सर्वैः पठनीयम्। तदुक्तं -

अविदितगुणाऽपि सुकवेर्भणितिः कर्णेषु वमति मधुधाराम्।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला।।

काव्योपदेशः अमृतपानसमानः भवतीति सुभाषितरत्नभाण्डागारे वर्णितं यथा –

रे रे खलाः शृणुत मद्वचनं समस्ताः
स्वर्गे सुधास्ति सुलभा न तु सा भवद्भिः।
कुर्मस्तदत्र भवतामुपकारकारि
काव्यामृतं पिबत तत्परमादरेण।। (तत्रैव, पृष्ठा.३२)

तदुक्तमपि सुभाषितग्रन्थेषु –

संसारविषवृक्षस्य द्वे एव मधुरे फले।
सुभाषितरसास्वादः सङ्गतिः सुजने जने।। इत्यादि।

अद्यत्वे को वा सुभाषितं वचनं श्रोतुमभिलषेत्। परन्तु काले काले सज्जनाः एव सुभाषितं सादरं गृह्णन्ति। दुर्जनाः सुभाषितं नेच्छन्ति। अतः कादम्बरीकथाकारः महाकविः बाणभट्टः उल्लिखति-

सुभाषितं हारि विशत्यधोगलात् न दुर्जनस्यार्करिपोरिवामृतम्।
तदेव धत्ते हृदयेन सज्जनः हरिर्महारत्नमिवातिनिर्मलम्।। इत्यादि।

तदित्थं सुभाषितभावभरिते संस्कृतसाहित्ये प्रसिद्धेषु काव्यनाटकेषु महाकवेः कालिदासस्य अभिज्ञानशाकुन्तलमधिकृत्य लोकोपदेशविषये किञ्चिदुपस्थाप्यते ।

**अभिज्ञानशाकुन्तले लोकोपदेशः**

सुविस्तृतलौकिकसंस्कृतसाहित्ये मनुष्यसमाजस्य सुनियन्त्र-णाय प्राचीनकविभिः पण्डितैश्च बहुविधः लोकोपदेशः समुपवर्णितः दरीदृश्यते। तत्र भरतमुनिः नाट्यशास्त्रे कथयति यत् –

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्धनम्।
लोकोपदेशजननं नाट्यमेतद् भविष्यति।। इति। (ना. शा., १/११५)

एतदनुसारं संस्कृतनाटकानां लोकोपादेयता नितरां प्रतीयते। किञ्च -

काव्येषु नाटकं रम्यम्,तत्र रम्या शकुन्तला ।
तत्र च चतुर्थोऽङ्कः तत्र श्लोकचतुष्टयम् ।।

इत्यादि कथनानुसारं संस्कृतनाटकेषु महाकविकालिदासविरचितस्य अभिज्ञानशाकुन्तलम् नाम नाटकस्य न केवलं रमणीयता, अपि तु समाजे काले काले उपादेयता समाजशास्त्रिभिरनुभूयते। अतः प्रसिद्धजर्मन् कवेः गेटेमहोदयस्य कथनं श्रीवासुदेवविष्णुमिराशीमहाभागः संस्कृतभाषया लिखति-

वासन्तं कुसुमं फलं च युगपत् ग्रीष्मस्य सर्वं च यत्
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयो-
रैश्वर्यं यदि वाञ्छसि प्रियसखे ! शाकुन्तलं सेव्यताम् ।।

गेटेमहोदयस्य अभिज्ञानशाकुन्तलविषयकमभिप्रायं प्रशंसन् कवीन्द्रः रवीन्द्रोऽपि ब्रूते- "गेटे की समालोचना का अनुसरण कर मैं फिर भी यही कहता हूँ कि शकुन्तला के आरम्भ के तरुण सौन्दर्य ने मङ्गलमय परम परिणति से सफलता प्राप्त कर मर्त्य को स्वर्ग के साथ सम्मिलित करा दिया है ।" (संस्कृत-सुकवि-समीक्षा, पृ. ७५)

तस्मात् अभिज्ञानशाकुन्तले वर्णितानां लोकोपदेशानां पर्यालोचनेन साम्प्रतिकसमाजे मानवीयमूल्यबोधस्य प्रतिष्ठायै काचित् प्रेरणा प्राप्येत इति तदर्थमत्र प्रयासः विधीयते।

**अभिज्ञानशाकुन्तले लोकोपदेशानां प्रासङ्गिकता**

"लोको वेदस्तथाऽध्यात्मं प्रमाणं त्रिविधं स्मृतम्" इति वचनात् व्यवहारमार्गे लोकप्रमाणं प्रथमं स्वीक्रियते। तत्र लोकोपदेशप्रदाने सर्वथा सिद्धहस्तः कविकुलतिलकः कालिदासः विविधचरित्रमुखेन लोको-पदेशान् प्रस्तौति। तत्र नाटके वर्णितेषु विविधचरित्रेषु अरण्यनिवासी महात्मा क्रान्तदर्शी कण्वमहर्षिः लोकव्यवहारनिपुण इति तदीयकण्ठतः समुद्घोषयति। पुत्र्याः शकुन्तलायाः पतिगृहगमनावसरे तस्यै उपदेशप्रदानाय सम्बोधयति- "वत्से ! त्वमिदानीमनुशासनीयासि। वनौकसोऽपि सन्तो लौकिकज्ञा वयम् इति" (अभि. शा. ४)। अनेन ज्ञायते यत्- महाकविः स्वयमेव लोकोपदेशप्रदाने समर्थ इति। किञ्च अरण्यवासी महर्षिरयं शकुन्तलायाः पतिगृहगमनेन विरहदुःखमप्यनुभवति । तदीयं पितृहृदयं सर्वथा द्रवीभूतमनुभूयते । सः शकुन्तलायाः न जनकः, तथापि स्नेहवशात् नितरां पीडितोऽस्तीति लौकिकं व्यवहारं प्रमाणयति । यथा -

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं न तनयाविश्लेषदुःखैर्नवैः ।। (अभि. शा. ४/८)

अतस्तदानीन्तनसामाजिकीं स्थितिं पुरस्कृत्य विविधच्छलेन लोकोपदेशप्रदाने महाकविः महान् प्रयत्नवान् परिदृश्यते। तच्च यथा –

**१. राजविषयकोपदेशः**

नाटकेऽस्मिन् नायकः हस्तिनापुरस्य सम्राट् महाराजः दुष्यन्तः। यद्यपि मृगयाविनोदः राजधर्मः, तथापि "अहिंसा परमो धर्म" इति नैव विस्मर्त्तव्यम्। अतः मृगयाऽवसरे आश्रममृगाणां हननं न कर्त्तव्यमिति ऋषिकुमारैः सूच्यते। किञ्च "रञ्जनात् किल राजत्वं प्रजानां पालनादपि" इति पञ्चमवेदमहाभारतकथनानुसारं "राज्ञा रक्षितव्यानि तपोवनानि" इति प्रथमाङ्के अनसूया-प्रियम्वदयोः उक्त्या ज्ञायते।

यः राजा भवति, तस्य विश्रान्तिरेव न स्यात्। अतः पञ्चमाङ्के कण्वशिष्याणामागमनप्रसङ्गे कञ्चुकिमनसि इयं भावना जायते यत्- "अविश्रामो हि लोकतन्त्राधिकारः" इति। राज्यशासनं निजहस्तेन स्वीकृतच्छत्रमिव प्रतिभाति। छत्रधारी सर्वथा कष्टं सहते, किन्तु छत्रस्याधः वर्तमानाः मानवाः सुखमनुभवन्ति। तद्युक्तमुक्तं कविना-

औत्सुक्यमात्रमवसादयति प्रतिष्ठा
क्लिश्नाति लब्धपरिपालनवृत्तिरेव ।
नातिश्रमापनयनाय यथा श्रमाय
राज्यं स्वहस्तधृतदण्डमिवातपत्रम् ।। इति (तत्रैव- ५/५)।

राज्ञां मनः परिहार्ये वस्तुनि न प्रवर्त्तते। अतः द्वितीयाङ्के शकुन्तलां दृष्ट्वा तस्यामनुरक्तः दुष्यन्तः क्षत्रियो भूत्वा मुनिकन्यां परिणेतुं न शक्नुयादीति चिन्तितवान्। परन्तु सा विश्वामित्रस्य पुत्री इति ज्ञात्वा सहर्षं कथितवान् - "न परिहार्ये वस्तुनि पौरवाणां मनः प्रवर्त्तते" इति।

राजा दुष्यन्तः स्वसुखे निरभिलाषः वर्त्तते। तच्चोक्तं -

स्वसुखनिरभिलाषः खिद्यसे लोकहेतोः
प्रतिदिनमथवा ते सृष्टिरेवंविधैव।
अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं
शमयति परितापं छायया संश्रितानाम्।। (तत्रैव- ५/६)

पुरुवंशीयाः राजानः सर्वथा प्रजापरिपालनदक्षाः। ते दुःखार्त्तानां हतभाग्यानाञ्च शरणदाने संसिद्धाः भवन्ति। अतः षष्ठाङ्के उद्घोषितं -

येन येन वियुज्यन्ते प्रजाः स्निग्धेन बन्धुना।
स स पापादृते तासां दुष्यन्त इति घुष्यताम्।। (तत्रैव- ६/१५)

**२. प्रजाजनविषयकोपदेशः**

प्रजाः सर्वथा सत्पुरुषाः भवेयुः। कोऽपि कस्यापि सकाशात् उत्कोचं न स्वीकुर्यात्। परन्तु नाटके षष्ठाङ्के धीवरसकाशात् अङ्गुलीयकं दृष्ट्वा दुष्यन्तः शकुन्तलाविषयं स्मृतवान्। अतः सः परमप्रीतस्सन् धीवराय प्रभूतं धनं प्रायच्छत्। तदा भट्टाः अपि तस्मात् अर्द्धभागं स्वीकृत्य मद्यपानार्थं शौण्डिकापणं गन्तुमुत्सहन्ते। इयं तु वार्त्ता सामा-जिकीं समस्यामुपस्थापयति। तथापि तदानीन्तनकाले भट्टा एतादृश-व्यवहारकुशला आसन्निति चित्रं किञ्चित् चित्रितं नाट्यकारेण।
समाजे स्त्रीणां विषये महद्गौरवं प्रदातव्यम्। परस्त्रीदर्शनं पापाय भवतीति सूचितं पञ्चमाङ्के। तत्र शकुन्तलां दृष्ट्वा दुष्यन्तः चिन्तयति - "अनिर्वर्णनीयं परकलत्रम्" इति। महाकविः कालिदासः नाटकेऽस्मिन् सूचयति यत्- सर्वेषां जीवने सुखदुःखानि समापतन्त्येव। चतुर्थाङ्के प्रभातवर्णनाऽवसरे ऋषिकण्वशिष्यमुखेन तद् वर्ण्यते यथा -

यात्येकतोऽस्तशिखरं पतिरोषधीना-
माविष्कृतोऽरुणपुरस्सर एकतोऽर्कः।
तेजोद्वयस्य युगपद्व्यसनोदयाभ्यां
लोको नियम्यत इवैष दशान्तरेषु।। (तत्रैव- ४/२)

क्रोधः अनर्थस्य मूलं भवतीति नाटकस्य चतुर्थाङ्के दुर्वाससः अभिशापप्रसङ्गेन सूचितम्। अतः समाजे सर्वेषां व्यवहारः सुश्रृङ्खलितः भवति चेत् मानवीयः मूल्यबोधः नितरां प्रतितरां प्रतिष्ठितो भवेत्।

**३. वरस्य दुष्यन्तस्य कृते वधूबन्धूनां पक्षतः कण्वमुनेः उपदेशः**

लोकव्यवहारनिपुणः कण्वमुनिः पुत्र्याः शकुन्तलायाः पतिगृहगमनावसरे स्वशिष्यस्य शारङ्गरवस्य माध्यमेन वरस्य दुष्यन्तस्य कृते सन्देशं प्रेषयति । समाजे विवाहानन्तरं वधूनां कृते जामातुः पक्षतः अनादरभावः न भवतु इति कण्वमुनिः सावधानं कारयति । यतः सः न धनिकः, यः पर्याप्तं धनं यौतुकाकारेण दातुं समर्थः । स तु तपोधनः । अतः विनम्रतया सम्मानपूर्वकमपि दुष्यन्तस्य वंशोन्नतेः प्रशंसां करोति । उच्चकुलजाः असदाचरणं न कुर्युरित्यर्थः । किञ्च बन्धुजनानामनुपस्थितौ शकुन्तलायाः विषये दुष्यन्तस्य स्नेहप्रवृत्तिः जाता । सा च स्नेहप्रवृत्तिः आजीवनं संरक्षणीया । राजभवने दुष्यन्तस्य अपराः स्त्रियः भवन्ति । ताः राजकन्यकाः, इयं शकुन्तला काचित् मुनिकन्येति भेदभावना दुष्यन्तस्य न स्यात् । अन्येषु दारेषु इयमपि शकुन्तला सामान्यतया ग्रहणीया । इतःपरं नाधिकं वधूबन्धुभिः प्रार्थ्यते । अन्यत् सर्वं भाग्याधीनमेव । अत्र कण्वमुनेः कथने सभङ्गश्लेषद्वारा अपूर्वः व्यङ्ग्यार्थः अभिव्यज्यते । तदीयं पितृहृदयं सदम्भमुद्घोषयति यत् सा शकुन्तला सामान्यप्रतिपत्तिपूर्वकं दारेषु दृश्या, किञ्च सा शकुन्तला मान्याप्रतिपत्तिपूर्वकमपि दृश्या इति सहृदयैरवगम्यते । यदि तस्याः शकुन्तलायाः कृते यथोचितं सम्माननं न क्रियेत, तदा वयं संयमधनाः किमपि कर्त्तुं शक्नुमः इत्यपि सन्देशः दुष्यन्तेनावगन्तव्य इति ध्वन्यते । तद्यथा –

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिश्च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्याधीनमतः परं न खलु तत्स्त्रीबन्धुभिर्याच्यते ।। इति । (अभि.शा.४/१९)

**४. वधूजनविषयकोपदेश**

अभिज्ञानशाकुन्तलनाटके नायिका शकुन्तला। तस्याः जीवन-चरितं सर्वथा भारतीयनारीणां कृते प्रेरणाप्रदायकं भवति। अस्माकं परम्परानुसारं यदा काचित् वधूः प्रप्रथमं श्वश्रृगृहं गच्छति, तदा तस्यै सदुपदेशः प्रदीयते ; येन सा पतिगृहे सदाचरणेन पारिवारिकं जीवनं सुखसमृद्धिमयं विधातुं समर्था स्यात्। नाटके वर्णिता शकुन्तला यद्यपि जन्मकालात् मातृपितृभ्यां विरहिता सती आश्रमे करुणार्द्रचित्तेन कण्वमुनिना पालिता सम्बर्द्धिता च, तथापि सा पतिगृहगमनकाले अनुशासनीया इति तस्याः पालयिता पिता कण्वमुनिः स्नेहेन वात्सल्येन च सम्बोधयति। पतिगृहे गुरुजनानां सेवा हि नारीणां परमो धर्मः। राजगृहे सपत्नीजनेषु सखिस्नेहः अपेक्ष्यते। अरण्यवासिनी काचित् तपस्विनी शकुन्तला दुष्यन्तस्य राजगृहे सुगृहिणीरूपेण कथं व्यवहरेदिति सदुपदिशति कण्वमुनिः। यथा -

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्त्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भोगेष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।। (तत्रैव- ४/२०)

कन्यकाः विवाहात्पूर्वं न केनापि अज्ञातेन पुरुषविशेषेण सह सम्पर्कं स्थापयेयुः। सर्वथा सर्वतो दृष्ट्या परीक्ष्य केनापि सह मित्रता सम्पादनीया। अन्यथा जीवनं दुर्विसहं भवेत्। एतच्च प्रतिपादितं पञ्चमाङ्के दुष्यन्तेन तिरस्कृतां शकुन्तलां प्रति शार्ङ्गरवस्य वचनेषु -

अतः परीक्ष्य कर्त्तव्यं विशेषात् सङ्गतं रहः।
अज्ञातहृदयेष्वेवं वैरी भवति सौहृदम्।। (तत्रैव- ५/२७)

समाजे स्वबन्धुभिः सह विचार्य विवाहसम्बन्धः स्थिरीकर्त्तव्यः। अन्यथा सतीमपि जनः अन्यथा विशङ्कते। तद्युक्तमुक्तं -

सतीमपि ज्ञातिकुलैकसंश्रयां
जनोऽन्यथा भर्त्तुमतीं विशङ्कते।
अतस्समीपे परिणेतुरिष्यते
प्रियाऽप्रिया वा प्रमदा स्वबन्धुभिः।। (तत्रैव- ५/१८)

पिता समुचिते समये कन्यकां समुपयुक्ताय वराय प्रयच्छेत्। यतः कन्या परस्य सम्पत्तिः भवति। तस्याः प्रदानेन पितरः निश्चिन्ताः भवितुमर्हन्ति। एतच्च सूचितं यथा –

अर्थो हि कन्या परकीय एव
तामद्य सम्प्रेष्य परिग्रहीतुः।
ममापि जातं विशदः प्रकामं
चिरस्य निक्षेपमिवार्पयित्वा।। (तत्रैव- ४/२४)

तत्रैव भारतीयसामाजिकपरम्परानुसारं स्त्रीणां पतिकुले दास्यमपि क्षमम् इति शार्ङ्गरवस्य वचनं समाजे नैतिकतां सर्वथा सर्वदा च प्रतिपादयति। तच्च यथा -

यदि यथा वदति क्षितिपस्तथा
त्वमसि किं पुनरुत्कुलया त्वया।
अथ तु वेत्सि शुचि व्रतमात्मन:
पतिगृहे तव दास्यमपि क्षमम्।। (तत्रैव- ५/३०)

**५. मित्रजनविषयकोपदेश:**

समाजे सन्मित्रैस्सह जीवनं सुखमयं सम्पद्यते। नाटकेऽस्मिन् राज्ञ: दुष्यन्तस्य परममित्रं विदूषक:। तस्य वाक्यं दुष्यन्तेन सर्वथा पालनीयमिति सूचितं द्वितीयाङ्के यथा - "अनतिक्रमणीयं मे सुहृद्वाक्यम्" इति। यत: सुहृद्वाक्यं य: न शृणोति, तस्य विपत् सन्निहिता भवतीति कथ्यते। यथा -

सुहृदां हितकामानां य: शृणोति न भाषितम्।
विपत्सन्निहिता तस्य स नर: शत्रुनन्दन:।। (हितोपदेश:, श्लोक: - ५५)

अपि च कस्यचित् मनुष्यस्य दु:खं मित्रजनेषु संविभक्तं सोढुं शक्यते। मित्रस्य पुरत: दु:खविनिवेदनेन मानसिक: क्लेश: दूरीभवति। तदुक्तं तृतीयाङ्के -

"स्निग्धजनसंविभक्तं हि दु:खं सह्यवेदनं भवति" इति।

राजा दुष्यन्त: प्रियमित्रस्य इन्द्रस्य कृते युद्धे साहाय्यार्थं स्वर्गं गत: इति नाटके वर्णितम्। अनेन भूलोकवासिनां स्वर्गवासिभि: सह मित्रता सुदृढा आसीदिति वक्तव्यं भवति। तत्रापि इन्द्रस्य दुष्यन्तं प्रति सम्मानप्रदर्शनं, दुष्यन्तस्य च इन्द्रं प्रति कर्त्तव्यतासम्पादनादिकथोपकथनं मातलिना सह यत् संवृत्तं सप्तमाङ्के तत् मित्रजनविषयकोपदेश: महान् इति सामाजिकै: स्वीकर्त्तव्य:। यतस्तत्र मित्रयोरुभयो: परस्परं सौहार्दपूर्णं भावविनिमयं वर्णयति महाकवि:।

**६. अतिथिविषयकोपदेश:**

अतिथिजनेषु गौरवप्रदानाय भारतीयसंस्कृते: मूलमन्त्र: - "अतिथिदेवो भव" इति। अत: नाटके प्रथमाङ्के राजा दुष्यन्त: शकुन्तलाया: दर्शनेन तत्र मधुरसम्भाषणेनैव आतिथ्यं प्रकटितमिति वर्णितमस्ति - "गिरा कृतमातिथ्यमि"ति। किञ्च अतिथे: सन्निकटे समुपवेशनं कर्त्तव्यमिति अनसूयावचनात् ज्ञायते - "उचितं न: पर्युपासनमतिथीनाम्" इति। अपि च तत्रैव - "न युक्तमकृत-सत्कारमतिथिविशेषं विसृज्य स्वच्छन्दतो गमनम्" इति। किञ्च पूज्यपूजाया: व्यतिक्रमेण महान् अपराध: सञ्जायते इति दुर्वासस: अभिशापवचनात् (विचिन्तयन्ती....., अभि. शा. ४/१) शकुन्तलाया: दुर्दशादर्शनेन ज्ञायते। तदुक्तं कालिदासेन रघुवंशेऽपि -

ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मन: ।
प्रतिबध्नाति हि श्रेय: पूज्यपूजाव्यतिक्रम:।। (रघुवंशम्- १/७९)

**७. परिवेशपरिरक्षणोपदेश:**

अस्मिन् नाटके प्रकृतिप्रेमी महाकविकालिदास: परिवेशपरि-रक्षणार्थं समाजं प्रति सर्वथा प्रेरयति। तपोवनादीनां परिरक्षणं राज्ञां परमकर्त्तव्यमिति प्रथमाङ्के सूचितम्। प्रकृते: समुपासक: अयं महाकवि: कण्वमुने: आश्रमे शकुन्तलादिभि: लतापादपादीनां सम्वर्द्धनेन एतत्तथ्यं समुपस्थापयति। माधवीलतादिषु शकुन्तलाया: भगिनीस्नेह: प्रदर्शित:। शकुन्तलाया: पतिगृहागमनावसरे कण्वमुने: -

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये व: कुसुमप्रसूतिसमये यस्या भवत्युत्सव:
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ।। (अभि.शा. ४/११)

इत्यादि उक्तिषु तदीय: पारिवारिकस्नेह अभिव्यक्तो भवति। किञ्च शकुन्तलाया: शरीरमण्डनार्थं तत्र सर्वविध-वस्तुनि लतापादपै: प्रदत्तानि इति अद्भुतं वर्णनं परिवेशपरिरक्षणार्थं सर्वथा प्रेरयति।

**८. समाजे सामान्यलोकोपदेश:**

महाकवि: कालिदास: नाटकेऽस्मिन् सामाजिकान् लोकोपदेश-प्रदाने तत्पर: दृश्यते। तत्र स्त्रीणां मङ्गलकाले रोदनं न करणीयमिति चतुर्थाङ्के सूचयति - "उचितं न तु मङ्गलकाले रोदितुं" इति। चापल्यं हि सर्वथा कष्टप्रदायकं भवति। अत: पञ्चमाङ्के शार्ङ्गरव: सूचयति- "आत्मकृतं चापलं अप्रतिहतमात्मानं दहति" इति। स्त्रिय: प्रत्युत्पन्नमतय: भवन्ति। तच्चोक्तं पञ्चमाङ्के -

स्त्रीणामशिक्षितपटुत्वमममानुषीषु
सन्दृश्यते किमुत या: प्रतिबोधवत्य:।
प्रागन्तरीक्षगमनात्स्वत्वमपत्यजात-
मन्यैर्द्विजै: परभृता: किल पोषयन्ति।। (तत्रैव- ५/२३)

मातापितरौ चिरकालं यावत् भर्त्तृवियोगदु:खितां दुहितरं द्रष्टुं न पारयत इति षष्ठाङ्के विदूषक: राजानं सूचयति। तस्मात् विवाहात्परं कन्यका: सर्वथा पतिगृहे एव भवेयु:। तपस्विन: धीरप्रशान्ता: भवेयु:। तेषामाचरणं समाजं सम्यक् संस्कारयति। अत: द्वितीयाङ्के दुष्यन्त: तापसानां स्वरश्रवणेन स्वयं प्रशान्त: सञ्जायते। प्राय: ऐश्वर्यमत्तेषु विकार: भवतीति पञ्चमाङ्के शकुन्तलां तिरस्कुर्वन्तं दुष्यन्तं प्रति शार्ङ्गरव: कथयति। तदवसरे स: स्पष्टभाषया दुष्यन्तं प्रति सम्बोधयति-

तदेषा भवत: कान्ता त्यजवैनां गृहाण वा।
उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी।। (तत्रैव- ५/२९)

सप्तमाङ्के यदा दुष्यन्त: स्वर्गात् भूलोकं प्रत्यागच्छति, तदा मार्गे मारीचाश्रमं दृष्ट्वा तदीयं शुभाशिषं स्वीकर्त्तुमुचितम्मनुते। अत: तेनोक्तम् - "अनतिक्रमणीयानि श्रेयांसि" इति। अर्थात् गुरुजनानां सकाशात् शुभाशीर्वादग्रहणेन जीवनं शून्यात् पूर्णतां प्राप्नोति। एतच्च सञ्जातं तत्र दुष्यन्तस्य जीवने। नाटके तत्रैव दुष्यन्तशकुन्तलयो: पुनर्मिलनं सञ्जातम्। तस्मिन् समये महर्षि: मारीच: सदुपदिशति - "सह धर्मचारिणं प्रति न त्वया मन्यु: कर्त्तव्य:" इति। अनेन दम्पत्यो: स्नेहसद्भाव: नैतिकविचारबोधश्च सर्वथा संवर्द्धते।

तदित्थं संस्कृतसाहित्यस्योपदेशसन्दर्भे स्थालीपुलाकन्यायेन अभिज्ञानशाकुन्तलनाटके लोकोपदेश: समुपस्थापित: इत्यलं पल्लवितेन।

**सन्दर्भग्रन्थसूची**


१. अभिज्ञानशाकुन्तलम्, पं. शिवप्रसाद द्विवेदी, भारतीय विद्या प्रकाशन, दिल्ली- २०००।
२. उत्तररामचरितम् - डा. रमाशङ्करत्रिपाठी, कृष्णदास अकादमी, वाराणसी- २०००।
३. उत्तररामचरितसमालोचना- श्रीअनन्तत्रिपाठिशर्मा, शिरोमणि प्रेस्, ब्रह्मपुर (गञ्जाम)१९७८।
४. कालिदास अपनी वात - आचार्यरेवाप्रसादद्विवेदी ।
५. कालिदास - एक साहित्यिक मूल्याङ्कन, डा. मञ्जुलागुप्ता, अभिषेक प्रकाशन, दिल्ली, २००९।
६. कालिदास और उसका मानवीय साहित्य - डा. अच्युतानन्द घडियाल् ।

७. कालिदास और उसकी काव्यकला - विद्यामार्तण्ड वागीश्वर विद्यालङ्कार, मोतिलालबनारसीदास, २००९।
८. कालिदासकृतिषु पुरुषार्थचतुष्टयपरामर्शः - डा. सिएच्.पि. सत्यनारायणः, रा.सं.विद्यापीठम्, तिरुपतिः - १९९९।
९. कालिदासकृतं मेघदूतम् - प्राध्यापकः श्रीराधामोहनमहापात्रः, बुक्स् एण्ड् बुक्स, कटक - १९९७।
१०. कालिदास की कृतियों में धर्मशास्त्रीय विषयः, डा. श्रीपति त्रिपाठी, नागप्रकाशक, दिल्ली- १९९७।
११. कालिदासग्रन्थावली - रेवाप्रसादद्विवेदी - B.H.U., वाराणसी, १९८६
१२. कालिदासो निसर्गश्च - आचार्य उ. शङ्करभट्टः, तिरुपतिः ।
१३. रघुवंशम्, डॉ. श्रीकृष्णमणि त्रिपाठी, चौखम्बा सुरभारती प्रकाशन, वारणासी- २००४
१४. संस्कृतसाहित्य का इतिहास - आचार्य बलदेव उपाध्याय, शारदा निकेतन, वाराणसी- २००१।
१५. संस्कृत निबन्धशतकम्, डॉ. कपिल देव द्विवेदी, वि. वि. प्रकाशन वारणासी- २००८।